International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(1): 286-287
© 2022 IJSR
www.anantaajournal.com
Received: 26-11-2021
Accepted: 12-01-2022

रंजेश्वर झा
विश्वविद्यालय–संस्कृत–विभागः, ललित नारायण मिथिला विश्वविद्यालय, दरभंगा, बिहारः, भारत

Corresponding Author:
रंजेश्वर झा
विश्वविद्यालय–संस्कृत–विभागः, ललित नारायण मिथिला विश्वविद्यालय, दरभंगा, बिहारः, भारत

# संस्कृतसाहित्ये पर्यावरणस्य महत्त्वम्

रंजेश्वर झा

**प्रस्तावना**

आधुनिके वर्त्तमाने भारतेन सह सम्पूर्णविश्वे पर्यावरणीयसमस्या सञ्जाता। तस्याः मूलकारणं प्रदूषणमत्यधिकं प्रदूषणेन पर्यावरणं दूषितं भवति। यदा पर्यावरणस्य महत्त्वं सर्वजनज्ञातं भविष्यति। तदा पर्यावरणसँरक्षणमपि भविष्यति। अस्य महत्त्वं वेदादिसंस्कृतशास्त्रे विशदरूपेण समुल्लितखितम्। प्रकृतालेखस्य मुख्यप्रतिपाद्यविषयोऽस्ति। संस्कृत–साहित्ये पर्यावरणस्य महत्त्वम्–

''पर्यावरणमिति'' शब्दः परि + आङ् उपसर्गद्वयपूर्वकं वृञ् धातोः लयुट् प्रत्ययेन निष्पद्यते। व्युत्पत्तिर्यस्याऽस्ति– ''पारितः आब्रीयते (आच्छाद्यते) अनेनेति पर्यावरणम्''[1] अर्थात् आच्छन्नमस्ति भूमण्डलं येन तत् पर्यावरणमिष्यते–

> ''भूमेरावरणं वायुर्जलं चैव वनस्पतिः।
> जगदाधाररूपं तत्पर्यावरणमुच्यते।।[2]

पर्यावरणस्य विषये वेदोक्तमन्त्रोऽयं द्रष्टव्यः–

ओं द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिः ओषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सामाशान्तिरेधि।।[3]

वेदस्य प्रस्तुतोऽयं मन्त्रः पृथ्व्यां शान्तिः, आकाशे शान्ति, अन्तरिक्षे शान्तिः, जले शान्तिः, औषदौ शान्तिर्वनस्पतौ शान्तिश्च भवेत्। एतानि सर्वाणि शान्तिकल्पनानि अस्माकं वैदिककालस्य मन्त्रद्रष्टारः ऋषयः पूर्वमेव वेदेषु निरुपयित्वा भयानक– पर्यावरणीयप्रदूषणस्य मुक्तये अनेकमुपायं कुर्वन्ति स्म। तस्मिन् समये पर्यावरणं पूर्णरूपेण सन्तुलितं तिष्ठति स्म। तदानीं प्रदूषणं जटिलसमस्या नासीत्। तथापि मन्त्रद्रष्टागणेन भावीसमयस्य महासौटतम् अनुभूय, तत् समाधानाय उपायाः अपि प्रदर्शिताः।

वैदिककालादारभ्य इदानीं यावत् अनेके मतानुयायिनः पर्यावरणं प्रति सचेष्टाः आसन्। मनुष्यान् प्रकृतिं प्रति आत्मीयसम्बन्धं स्थापयितुं शिक्षां प्रददाति। पर्यावरणस्य प्रधानतत्त्वं मनुष्यस्य हृदये सौन्दर्यबोधं प्रस्फुटितं कृत्वा पर्यावरणम्प्रति अपनत्वभावनया संस्कृत–साहत्यं जागृतवान्। अनया दृष्ट्या संस्कृतं पर्यावरणीय– साहित्यमस्ति, एतत् कथने कोऽपि न हि दोषः, संस्कृत–साहित्ये एकपक्षे भौतिक–पर्यावरण–संरक्षणस्य प्रयत्नो वर्त्तते तथा तेनैव सह सांस्कृति–बौद्धिक–वैचारिक–पर्यावरणानाञ्च संरक्षणे न हेत्वपि उन्मुखी कृतमस्ति। येन निरक्षरता उदासीनता च पर्यावरणम्प्रति भूत्वाऽपि पर्यावरणं संरक्षितमस्ति। यथा शुक्लयजुर्वेदस्य एषो मन्त्रः–

> ''मित्रस्याऽहं चक्षुषा सर्वाणि भूतानि समीक्षे।
> मित्रस्य चक्षुषा समीक्षा महे।।[4]

अर्थात् वनस्पतिभिः सत्रा सर्वप्राणिनो वयं मित्रस्य दृष्ट्या पश्याम तैरेव सह सर्वे लोकाः परस्परं स्वलोकान् अन्यलोकांश्च मैत्रीपूर्ण दृष्ट्या पश्येम।

वेदेषु बहुवार उद्घोषोऽयमस्ति यत् जलस्य शुद्धतां पवित्रताञ्च रक्ष जलमिदं समेषां प्राणिनां जीवनं शुद्धं पवित्रञ्च करिष्यति। वायुमण्डलं प्रदूषणमुक्तं स्थापयन्तु, येन सर्वाणि शरीराणि स्वच्छप्राणवायुः लप्स्यन्ते। पृथ्वीमाताऽस्ति तया सन्निकटमनुभवं कुरुत–

> ''उपसर्पमातरं भूमिम्'' ।[5]

इयं पृथिवी स्वास्थ्यवर्धकस्य उत्तमसुगन्धं प्रदास्यति। अग्नितत्त्वात् प्रदूषणे मुक्तिः प्राप्यते, येन खलु मनुष्यानाम् अन्यप्राणिनाञ्च शरीरं देदीप्यमानं भविता।

आकाशे प्रदूषणमुक्तो भविष्यति तथा ध्वनिः (शब्दः) अभिशापं न भविष्यति अर्थात् शब्दाघातं न हि करिष्यति। कर्णपटले शब्दोऽयम् अपशब्दो न दास्यति। आघातः पञ्चतत्त्वात् प्रदूषणमुक्तादेव भवतु, तदनन्तरम् औषधिः वनस्पतिश्च रोगरहितं पोषको भविष्यति।
सन्तुलित–पर्यावरणस्य सर्वाधिकमहत्त्वपूर्णः कारकवृक्षोऽस्ति। एवं वेदेषु वृक्षं प्रति देवत्वभाव–स्थापितस्य उपदेशोऽस्तिः–

नमो वृक्षेभ्यो हरिकेशेभ्यः।
वनानां पतये नमः औषधीनां पतये नमः।।[6]
अतस्त्वं देव वनस्पते शतवल्शो हि रोह।
सहस्रवल्शा वि वयं रूहेम।।[7]

श्रीमद्भगवद्गीतायां भगवन्तः श्रीकृष्णाः सम्पूर्णजगताम् उपमा पिप्पलस्य वृक्षात् ददाति–

''उर्ध्वमूलमधः शाखामश्वत्थं प्राहुरव्ययम्।
छन्दांसि यस्य पर्णानि यस्तं वेद–वेद वित्।।[8]

अर्थात् भगवत्श्रीकृष्णः परमेश्वरः पिप्पलवृक्षं सम्पूर्णजगतां रूपेण उल्लेखयति। वेदः यस्य वृक्षस्य पत्रं वर्त्तते। ये खलु मानवाः पिप्पलवृक्षमिमं मूलेन सहितं जानन्ति, तैः वेदानां तात्पर्यमपि ज्ञायन्ते। महाकवि कालिदासेन वृक्षम्प्रति आत्मीयतायाः भावेन अनेन प्रकारेण भावाभिव्यक्तं कृतं यत् रक्तसम्बन्धीवृक्षोऽस्ति। स स्वनायिकाम् उपमा वृक्षेन दत्तवान्। शकुन्तलायाः सौन्दर्यवर्णने तस्यात्रस्य तुलना वृक्षस्यात्रे करोतिः–

''अधरः किसलयरागः कोमल विटपानुकारिणी बाहू।
.......लोमनीयं यौवनमत्रेषु सन्नद्धम्।।[9]

शकुन्तला वृक्षं भ्रातृरूपे मन्यते। यस्मिन् प्रथमे फले पुष्पे वा सति प्रसन्नम्भूत्वा यावत् खलु वृक्षं जलं न पास्यति तावत् स्वयमेव जलं न गृह्णाति–

''आद्ये वः कुसुम प्रसूति समये यस्याः भवत्युत्सवः।
पातुं न प्रथमं व्यवस्यति जलं युष्मा स्वपीतेषु या।।[10]

वृक्षाणां शाखानामनन्तरं पर्यावरण–सन्तुलनने समं जलस्रोतस्य शुद्धता सर्वाधिका महत्त्वपूर्णाऽस्ति।
विषयेऽस्मिन् महर्षि–विश्वामित्रेण भगवान् श्रीरामः कथितं वचनं द्रष्टव्यमस्तिः–

''पूर्वजा भगिनी चाऽपि मम् राघव सुव्रता।
नाम्ना सत्यवती नाम ऋचिके प्रति पाविता।।[11]

वेदेषु वनाच्छादित–सम्पूर्णपृथ्व्याः सागरपर्यन्तं मातृरूपेण स्वीकृतम्–

''माताः भूमिः पुत्रोऽहं पृथिव्या'' ।[12]

अस्मिन् भूमण्डले अनेके प्रकारकाः वृक्षान् स्वास्थ्यरक्षक–वनस्पतीन् जीवनोपयोगिनः खनिजसम्पदांश्च अवलोक्य ऋषिजनाः पृथिवीं वन्दन्तेः–

''यस्यां वृक्षा वानस्पत्या ध्रुवास्तिष्ठन्ति विश्वहा।
पृथिवी अच्छा वदामसि।।[13]

अथर्ववेदे एव महर्षयः मानवानां सुरक्षाय कामयमानाः प्रार्थयन्तिः–

''गिरयस्ते पर्वता हिमवन्तोऽरण्य ते पृथिवी स्योनमस्तु।
अजीतोऽहतो अक्षतोऽध्यष्ठा पृथिविमहम्।।[14]

स्वजनानां जलस्रोतं विविधजलञ्च प्रति मुनयः पूर्णसचेताः आसन्। तस्यैव मूलकारणेन समुद्रस्य नद्याश्च विस्तृतोल्लेखेन सत्रा उपयोगितामपि कथितवन्तः–

''यस्यां समुद्र उत सिन्धुरापो।
यस्यामन्नं कृष्टयः सम्वभूषुः।।[15]

मात्रजलस्य उपलब्धतया मुनयः सन्तुष्टाः नः सन्ति अपितु जलस्य गुणवत्तां शुद्धताञ्च प्रत्यपि साकाङ्क्षिताः विद्यन्तेः–

''शुद्धाः आपस्तन्वे क्षरन्तु'' ।[16]

संस्कृत–साहित्ये भौतिकपर्यावरणेन समं सांस्कृतिकपर्यावरणस्याऽपि संरक्षणं व्याप्तरूपेण अस्ति। यदि अधुनाऽपि संस्कृत–साहित्ये वर्णित–नियमानां सम्यक् प्रतिपालनं भवेत् तदा सर्वात्र्पर्यावरणस्य शुद्धिः सात्विकश्च निर्माणं सम्भवमस्ति।
अनेन प्रकारेण वयं पर्यावरणस्य महत्त्वं प्रति यदाधिक्यगानं करिष्यामः तद् न्यूनमेव भविष्यतीत्यलम्।

।। इत्युक्तिः सफला जायेत।।

**सन्दर्भाः–**

1. पाणिनीयव्याकरणे 'वृञ्' धातोः आवरणेअर्थे प्रयोगोऽस्ति, तस्माद् ल्युट् प्रत्ययः ल्युट् च–3–3–115 इति सूत्रेण भवति। 'युवोरनाकौ–7–1–1 इति सूत्रेण तस्य अन् भवति।
2. पद्यमिदं बिहार स्कूल एग्जामिनेशन (इन्टरमिडिएट) पटनायां संस्कृतविषयकः कौस्तुभनामके ग्रन्थे समुपलब्धम्।
3. प्रस्तुतोऽयं मन्त्रः शुक्लयजुर्वेदस्य प्रसिद्धोऽस्ति सर्वजनमध्ये।
4. शु0य0 वेदस्य मन्त्रः–36–तमे अध्याय–18–तमे मन्त्रे समुपलब्धः।
5. अथर्ववेदीयो मन्त्रः
6. य0वे0 – 16–17–19
7. अथर्ववेदः– 5–43
8. श्रीमद्भगवद्गीता– 15–1
9. महाकविकालिदासेन प्रणीते अभिज्ञानशाकुन्तले नामके नाटके
10. अभिज्ञानशाकुन्तलम्– 1–21
11. वाल्मीकीये रामायणे–34–7–9 तमे समुद्धृतः।
12. अथर्ववेदः– 12–1–12
13. अथर्ववेदस्य– 12–1–27
14. अथर्ववेदीयो मन्त्रः ''पर्यावरणसुधा'' इति नामके ग्रन्थे समुद्धृतः।
15. अथर्ववेदीयमन्त्रे एतत्प्रसत्रम्– 12–1–3
16. एतत्पद्यं ''पर्यावरणसुधा'' नामके मैथिलीपुस्तके समुपलब्धम्, पद्यस्य प्रकाशनम्– 2013 तमे ईश्दीये, प्रकाशकः– मेकलसुतासाहित्यिक एवं सामाजिक संस्थान नर्मदापुरम्।

**सन्दर्भग्रन्थसूचयः**


1. वैयाकरणसिद्धान्तकौमुदी
2. कौस्तुभः (बिहार इन्टरमीडिएट के बारहवीं संस्कृत कक्षा में सलंग्न पुस्तक)।
3. शुक्लयजुर्वेदः
4. अथर्ववेदः
5. श्रीमद्भगवद्गीता
6. अभिज्ञानशाकुन्तलम्
7. वाल्मीकीय रामायणम्
8. पर्यावरण सुधा